॥ द्वितीयॊऽध्यायः ॥

श्रौतस्मृतिविरुद्धत्वात् स्मृतयॊ न गुणान् हरॆः ।
निषॆद्धुं शक्नुयुर्वॆदा नित्यत्वान्मानमुत्तमम् ॥ १ ॥

दॆवतावचनादापॊ वदंतीत्यादिकं वचः ।
नायुक्तवाद्यसन्नैव कारणं दृश्यतॆ क्वचित् ॥ २ ॥

असज्जीवप्रधानादिशब्दा ब्रह्मैव नापरम् ।
वदंति कारणत्वॆन क्वापि पूर्णगुणॊ हरिः ॥ ३ ॥

स्वातंत्र्यात् सर्वकर्तृत्वान्नायुक्तं तद्वदॆच्छ्रुतिः ।
भ्रांतिमूलतया सर्वसमयानामयुक्तितः ॥ ४ ॥

न तद्विरॊधाद्वचनं वैदिकं शंक्यतां व्रजॆत् ।
आकाशादिसमस्तं च तज्जं तॆनैव लीयतॆ ॥ ५ ॥

सॊऽनुत्पत्तिलयः कर्ता जीवस्तद्वशगः सदा ।
सदाभासॊ हरिः सर्वरूपॆष्वपि समः सदा ॥ ६ ॥

मुख्यप्राणश्चॆंद्रियाणि दॆहश्चैव तदुद्भवः ।

www.yousigma.com

मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥ ७ ॥

सर्वदोषोज्झितस्तस्माद्भगवान् पुरुषोत्तमः ।
उक्ता गुणाश्चाविरुद्धास्तस्य वेदेन सर्वशः ॥ ८ ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचित ब्रह्मसूत्राणुभाष्ये द्वितीयोऽध्यायः ॥

www.yousigma.com